MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

The Impact of Vyakarana on Kalpa: A Critical Study

कल्पे व्याकरणस्य प्रभावः — एकः विमर्शः

Brahmi Adhikari

Research Scholar, Department of Sanskrit
University of North Bengal, West Bengal, India.
Email: brahmiadhikari1998@gmail.com
Page No: 94-99

Abstract: *The Vedas constitute the primordial repository of all knowledge extant in this world. In facilitating the comprehension of the Vedic meaning, the six auxiliary limbs of the Veda (Ṣaḍvedāṅgas) occupy an indispensable place. Among these six Vedāṅgas, Kalpa is preeminent. The Kalpa-śāstra systematically delineates the rituals, sacrifices (yajñas), sacraments (saṁskāras), and procedural injunctions propounded in the Vedas; hence, the association of Kalpa with the ritualistic section (Karmakāṇḍa) of the Vedas is profoundly strong. It is exclusively through Kalpa that the operative methodology for performing the rituals ordained by the Śruti is comprehended.*

However, grammar (Vyākaraṇa) is fundamentally required for discerning the meaning of words present in the Vedic mantras, as well as for ascertaining their linguistic correctness. Grammar critically examines the morphological and structural essence of words occurring in prescriptive injunctions (vidhivākyas). Consequently, for a precise and flawless understanding of the injunctive statements employed within the Kalpasūtras, an analytical knowledge of words—encompassing base and suffix (prakṛti-pratyaya), gender (liṅga), inflectional endings (vibhakti), syntactic relations (kāraka), and nominal compounding (samāsa)—is absolutely indispensable.

Keywords: *Kalpavedāṅgam, Vidhivākyam, Yāgaḥ, Vyākaraṇam, Vibhaktiḥ, Samāsaḥ.*

उपोद्घातः — भारतवर्षस्य प्राचीनसभ्यतायाः जीवनपद्धत्याः च निर्वाहकः अस्ति कल्पम् इति वेदाङ्गम्। भारतीयसंस्कृतेः उत्सरूपेण वेदस्य गुरुत्वं सर्वजनैः विदितमस्ति। एतस्याः संस्कृतेः मूलस्रोतः भवति वेदः। तथा हि आचार्येण मनुना मनुसंहितायां प्रोक्तं यत्— "वेदोऽखिलं धर्ममूलम्" इति। अर्थात् इह जगति विद्यमानानामखिलानां धर्मणां मूलम् अस्ति वेदः। अस्य वेदस्य मुख्यविषयरूपेण वैदिककर्मकाण्डानि गृह्यन्ते। अर्थात् तत्र प्रधानतया श्रुतिप्रतिपादितानां यागादीनां प्रतिपादनं वर्तते। यतो हि मीमांसादर्शनस्य 'अर्थसंग्रहः' इत्यस्मिन् प्रकरणग्रन्थे यागादयः एव धर्मशब्देन अभिधीयन्ते।

मुण्डकोपनिषदि परा अपरा चेति उभयप्रकारविद्यायाः उल्लेखः विद्यते। तत्र वेदचतुष्टयेण साकं षड्वेदाङ्गानामपि अपराविद्यायाम् अन्तर्भावः प्रदर्श्यते। तथा चाम्नातम्— "तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षाकल्पव्याकरणं निरुक्तं छन्दोज्योतिषम्"[1] इति। शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषञ्चेति वेदाङ्गानां षडङ्गानि इति। पुरुषस्याङ्गानि यथा तस्य जीवनयात्रानिर्वहनाय उपकारकाणि भवन्ति तथैव वेदाङ्गान्यपि वेदार्थप्रतीतौ यागयज्ञानुष्ठाने च उपकारकाणि भवन्ति। तथा चोक्तं पाणिनीयशिक्षायाम्—

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते।।[2]

कल्पस्य स्वरूपम् — कृप् धातोः कर्मणि घञ् प्रत्ययेण "कल्पः" इति शब्दः निष्पद्यते। अस्य शब्दस्य व्युत्पत्तिजातः अर्थः "कल्प्यते समर्थ्यते यागप्रयोगो यस्मिन् सः कल्पः"[3] इति। अर्थात् वेदविहितानां यागादीनां कर्मणां साधनस्य कल्पना येन वेदाङ्गेन भवति सः कल्प इत्युच्यते। कर्मकाण्डं ज्ञानकाण्डञ्च भेदेन वेदस्य भागद्वयम् उपलभ्यते। तयोः भागयोः कर्मकाण्डेन सह सम्बन्धयुक्तः अस्ति अयं कल्पः इति। तस्य व्युत्पत्तिजातः अर्थः भवति यागादीनां प्रयोगे समर्थविशिष्टं शास्त्रमिति। तथा हि

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

उच्यते— "कल्पो वेदविहितानां कर्मणामानुपूर्व्येण कल्पनाशास्त्रम्"[4] इति। अर्थात् येन शास्त्रेण क्रमानुसारेण विधिपूर्वकेन क्रियमानानां यागादीनामनुष्ठानप्रक्रियाणां वर्णना भवति तद् शास्त्रं कल्पशास्त्रम् इति। वेदस्य षट्सु अङ्गेषु क्रियात्मकत्वाङ्गरुपेण कल्पस्य गुरुत्वपूर्णं स्थानं विद्यते। तथा च व्यवहारिकदृष्ट्या अपि कल्पवेदाङ्गस्य स्थानम् इतरेषु वेदाङ्गेषु अत्यन्तं तात्पर्यपूर्णमिति। अतः वेदपुरुषस्य हस्तरूपेण कल्पस्य ख्यातिः सुप्रसिद्धा इति। श्रौतसूत्रम्, गृह्यसूत्रम्, धर्मसूत्रम्, शुल्बसूत्रञ्चेति कल्पस्य प्रमुखाः विभागाः वर्तन्ते।

यागयज्ञादीनां कर्मणामनुष्ठानानां प्रक्रियाः कल्पेन एव कल्पिताः तथा समर्थिताः भवन्ति इति। देवतोद्देशेन हव्यादिद्रव्यत्यागो एव यज्ञो यागो वेति शब्देन प्रसिद्धः[5]। अत्र त्याग इति शब्दस्याभिप्रेतार्थः स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वोत्पादनम् इति। यागः द्विविधः भवति। यथा प्रकृतियागः विकृतियागश्चेति। ततः प्रकृतियागस्य लक्षणनिरूपणे त्रीणि लक्षणानि उल्लिख्यन्ते। ते यथा— यत्र कृत्स्नं क्रियाकलाप उच्यते सा प्रकृतिः[6] यथा दर्शपूर्णमासौ। यतो विकृतिरङ्गानि गृह्यानि सा प्रकृतिः। यथा— दर्शपूर्णमासौ। अपि च "प्रकृतिवद् विकृतिः कर्तव्या"[7] इति मीमांसकानां वचनम्। अर्थात् प्रकृतियागः येन प्रकारेण विधीयते, विकृतियागः अपि तेन प्रकारेण करणीयः। तत्र कस्यचिदेकस्य विकृतियागस्य प्रकृतियागः केन प्रकारेण निर्धारणं भवति इति एका शङ्का जायते। इत्यस्याः शङ्कायाः निरसणम् अपि परिलक्ष्यते। तथा हि महर्षिणा जैमिनिना प्रकृतियागस्य निरूपणसूत्ररूपेणोक्तम्— "यस्य लिङ्गमर्थसंयोगादभिधानवत्"[8] इति। यथा दर्शपौर्णमासः इति प्रकृतियागस्य देवता भवति अग्निः। तत्र अग्निदेवतामुद्दिश्य "अग्नये त्वा जुष्टं निर्वपामि" इति मन्त्रोच्चारणेन यागस्यानुष्ठेयत्वात् आग्नेययागः इति नाम्ना अभिधीयते। यतो हि अस्य यागस्य देवता अग्निः, ततः अग्नये इति अग्निबोधकं पदं तत्र प्रयुक्तम्। अस्य प्रकृतियागस्य विकृतियागः वर्तते सौर्ययागः इति। अस्मिन् यागे देवता भवति सूर्यः। प्रकृतियागे देवतावाचकस्य पदस्योत्तरं या विभक्तिः प्रयुज्यते विकृतियागेऽपि तस्या एव विभक्तेरपेक्षा भवति। अत्र प्रकृतियागे दर्शपौर्णमासयागे यथा चतुर्थीविभक्तेः प्रयोगो दृश्यते तथैव सौर्ययागे सूर्यशब्दात् अपि चतुर्थी करणीया भवति। एतच्च व्याकरणस्य ज्ञानाभावे न सम्भवति। महाभाष्यकारेण मुनिना पतञ्जलिना व्याकरणस्य मुख्यप्रयोजनानां निरूपणं कृतम्। तथा च तेन प्रोक्तम् "रक्षोहागमलघ्वसन्देहाः प्रयोजनम्। रक्षार्थं वेदानामध्येयं व्याकरणम्। लोपागमवर्ण-विकारज्ञो हि सम्यग् वेदान् परिपालयिष्यतीति"[9] इति।

अर्थात् अनेन प्रतिपाद्यते यत् व्याकरणस्य मुख्यप्रयोजनानि तावत् रक्षा ऊहः आगमः लघुः असन्देहश्चेति। एतेषु मुख्यप्रयोजनेषु ऊहः इत्यस्य सम्बन्धः वेदविहितेन मन्त्रेण सह वर्तते। यज्ञादीनामनुष्ठानकाले मन्त्राणां यथायथम् उच्चारणं करणीयम्। ततः मन्त्रेषु विद्यमानानां पदानाम् अपि यथार्थरूपेण प्रयोगः करणीयः। तेषां पदानां लिङ्गैः विभक्तिभिः च सह यथायथमुच्चारणं करणीयम्। येन उच्चारणेन यज्ञसम्बन्धीयानाम् अभीष्टाणां पशुपुत्रेत्यादीनाम् अर्थानां प्राप्तिः सम्भवति। यतः यागयज्ञादिषु कर्मणामनुष्ठानेषु वेदविहितेन मन्त्रोच्चारणेन देवतामुद्दिश्य आहुतिप्रदानं भवति। तत्र यतो हि विकृतियागेषु प्रकृतियागानां विधीयमानानां कर्मणाम् अतिदेशः भवति। अतः अतिदेशात् विकृतियागेषु अपि प्रकृतियागानाम् अङ्गसहितानां सर्वेषां कार्याणामनुष्ठानं विधेयमस्ति।

ततश्च प्रकृतियागानाम् उपदिष्टाणां वेदविहितानां मन्त्राणाम् अपि विकृतियागेषु अतिदिष्टात् विहितव्यम् अस्ति। परन्तु तेषु प्रकृतियागेषु विकृतियागेषु च देवताविषयकं किञ्चित् वैचित्रं विद्यते। अर्थात् प्रकृतियागे यस्य देवस्य स्तुतिः विधीयते विकृतियागे तथा न भवति। अपि तु तत्र भिन्नस्य देवस्य स्तुतिः विधेया अस्तीति। ततश्च फलस्वरूपेण प्रकृतियागे येषां वेदविहितानां मन्त्राणां प्रयोगः भवति विकृतियागे तेषां मन्त्राणां सामान्यतया परिवर्तनेन प्रयोगः करणीयः। तत्र प्रकृतियागे देवतावाचकस्य येन पदेन देवतां प्रति आहुतिप्रदानं भवति विकृतियागे तस्य प्रयुक्तस्य देवतावाचकस्य पदस्य विपरिणामम् अपेक्ष्यते। अर्थात् देवतावाचकस्य पदस्य लिङ्गविभक्तिभिः परिवर्तनं करणीयम्। यतो हि वेदेषु सर्वैः लिङ्गैः सर्वाभिः विभक्तिभिः च मन्त्रसमूहाणां पाठः न वर्तते। अतः यज्ञादिषु कर्मणामनुष्ठानेषु देवतां प्रति हव्यादीनां द्रव्याणां प्रदानकाले देवतावाचकाः शब्दाः अध्याहार्याः भवन्ति। ततश्च यथाविहितेषु यज्ञादिषु कर्मणामनुष्ठानेषु तेषां देवतावाचकानां पदानां लिङ्गविभक्तिभिः सह पाठः भवेत्। अर्थात् तेषां देवतावाचकानां पदानां परिवर्तनाय लिङ्गानुशासनं ज्ञातव्यम्। पुनश्च विभक्तीनां ज्ञानमपि अपरिहार्यमिति। एतत्तु व्याकरणस्य

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

ज्ञानेन एव सम्भवति इत्याशयः। तद्व्यातिरिक्तं देवतावाचकानां पदानां लिङ्गविभक्तिभिः विपरिणामम् इत्यस्य कार्यस्य साधनं नैव सम्भवम् इति वैयाकरणैः स्वीकृतम्। अतः यागानुष्ठाने यस्मै देवाय आहुतिप्रदानं विधेयमस्ति देवतावाचकस्य तस्य पदस्योच्चारणं लिङ्गैः विभक्तिभिः च यथार्थतया प्रयोगः कर्तव्यः। यतो हि विकृतियागेषु प्रकृतियागेभ्यः कर्मणामतिदेशः करणीयः। अतः देवतावाचकानां पदानां लिङ्गवचनैः विभक्तिभिः च विपरिणामं करणीयम्। तेषां प्रयोगः च व्याकरणशास्त्रस्य ज्ञानानुसारेण एव सम्भवति। वैदिकमन्त्रेषु प्रकृतियागानां देवताद्रव्यादयः विषयाः निर्दिष्टाः सन्ति परन्तु विकृतियागानां तथा न दृष्टम्। अतः विकृतियागेषु देवतामुद्दिश्य आहुतिप्रदानकाले वैदिकमन्त्रेषु विद्यमानानां निर्दिष्टाणां पदानां परिवर्तनसाधनार्थम् ऊहः विधेयः अस्ति। "ऊहः" इति पदस्यार्थः कल्पना इति। अर्थात् ऊहः तथा कल्पनायाः निमित्तं व्याकरणस्य अध्ययनं करणीयम्।[10] तथा हि मुनिना पतञ्जलिना प्रणीतं "महाभाष्यम्" इति शास्त्रे व्याकरणस्य प्रयोजनानां निरूपणावसरे प्रोक्तम्— "ऊहः खल्वपि। न सर्वैर्लिङ्गैन च सर्वाभिर्विभक्तिभिः वेदे मन्त्रा निगदितास्ते चावश्यं पुरुषेण यज्ञ गतेन यथायथं विपरिणमयितव्याः। तान्नावैयाकरणः शक्नोति यथायथं विपरिणमयितुम्। तस्मादध्येयं व्याकरणम्"[11] इति।

पुनश्च अग्निहोत्रम् इति एकः यागः। अग्निदेवतामुद्दिश्य "अग्नये स्वाहा" इत्युच्चारणेन हव्यादिद्रव्याणि प्रदीयन्ते। अत्र 'अग्नये' इति पदस्य प्रयोगः कथं केन प्रकारेण च भवति इत्यस्मिन् विषये प्रश्नो जायते चेत् तस्योत्तरं ज्ञापयति व्याकरणम् इति। तत्र 'स्वाहा' इति शब्दयोगात् अग्नि इत्यस्मात् शब्दात् "नमः स्वस्ति-स्वाहा स्वधालं वषड् योगाच्च"[12] इत्यनेन सूत्रेण चतुर्थीविभक्तौ 'अग्नये' इति पदं प्रयुज्यते। व्याकरणस्य ज्ञानं विना तस्य सम्यक्तया प्रयोगः न सम्भवति। यागादीनां कर्मणामनुष्ठानानां यथायथं सम्पादनादेव यजमानस्य अभीष्टफलप्राप्तिः भवति।

"असन्देहार्थं चाध्येयं व्याकरणम्। याज्ञिकाः पठन्ति— "स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेत" इति। तस्यां सन्देहः स्थूला चासौ पृषती, स्थूलानि पृषन्ती यस्याः सा स्थूलपृषतीति। तां नावैयाकरणः स्वरतोऽध्यवस्यति- यदि पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिः, अथ समासान्तोदात्तत्वं ततस्तत्पुरुष इति"।[13] यज्ञानुष्ठानकाले मन्त्रेषु विद्यमानानां पदानां यथार्थानां निरूपणावसरे विविधानां सन्देहानाम् उपस्थितिः जायते चेत् तेषां सन्देहानां निरसणाय अपि व्याकरणम् अध्येतव्यम्। तस्योदाहरणरूपेण "स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेत" इत्यस्य वचनांशस्योल्लेखं कृतं महाभाष्यकारेण मुनिना पतञ्जलिना। अर्थात् "स्थूलपृषतीम् अनड्वाहीम् अग्निवारुणीम् आलभेत" इत्यनेन निर्दिष्टं यत् यज्ञकर्तृभिः अग्निवरुणदेवेभ्यः स्थूलपृषतीविशिष्टा स्त्रीप्रजाती गाभी हन्तव्या इति। अत्र स्थूलपृषतीम् इत्यस्य पदस्य अर्थस्य निरूपणे सन्देहः जायते। यतो हि समासबद्धेन अनेन पदेन अर्थद्वयं निष्पद्यते। स्थूलपृषती इति पदस्य पृषत्[14] इत्यस्य शब्दस्यार्थः विन्दुः, श्वेतविन्दुयुक्तश्चेति। तत्र पृषत् इत्यस्मात् शब्दादुत्तरम् "उगितश्च"[15] इत्यनेन सूत्रेण ङीप् प्रत्ययात् पृषती इति शब्दः निष्पद्यते। ततः पृषती इत्यस्य शब्दस्य श्वेतविन्दुयुक्ता स्त्री इति अर्थः जायते। अतः स्थूलपृषती इति समासबद्धस्य पदस्य तत्पुरुषः इति समासेन "स्थूला चासौ पृषती च" इति विग्रहः सिद्ध्यते। इत्यनेन विग्रहवाक्येन तस्य पदस्यार्थः जायते यस्याः शरीरस्य आकृतिः स्थूला, श्वेतविन्दवः च यस्याः शरीरे वर्तमानाः सन्ति तादृशी अनड्वाही इति। तत्र 'समासस्य'[16] इति सूत्रेण स्थूलपृषती इत्यस्य तत्पुरुषसमासबद्धस्य समस्तपदस्य अन्त्यस्वरः उदात्तः भवति। अर्थात् तत्र तकारात् परं विद्यमानस्य ईकारस्य उदात्तः संज्ञा जायते। ततश्च "अनुदात्तं पदमेकवर्जम्"[17] इत्यनेन सूत्रेण कस्यचिदेकस्य पदस्य कश्चित् स्वरः यदि उदात्तः स्वरितश्चापि भवति तर्हि तस्मिन् पदे अवशिष्टाः सर्वे स्वराः अनुदात्तस्वरविशिष्टाः भवन्ति। व्याकरणस्य अध्ययनेन उदात्तादिभिः स्वरैः सन्दिग्धानां शब्दानाम् अर्थनिरूपणं सम्भवति।

पुनश्च "स्थूलानि पृषन्ति यस्याः" इत्यनेन विग्रहेण बहुव्रीहिः इति समासः भवति। तेन समासेन 'स्थूलपृषत्' इति शब्दः जायते। ततः "उगितश्च" इत्यनेन सूत्रेण स्थूलपृषत् इत्यस्मात् शब्दात् ङीप् प्रत्ययेण 'स्थूलपृषती' इति पदस्य सिद्धिर्भवति। तत्र "बहुव्रीहौ प्रकृत्या पूर्वपदम्"[18] इति सूत्रेण बहुव्रीहिसमासे पूर्वपदस्य प्रकृतिस्वरः भवति। अर्थात् समासात् प्राक् पूर्वपदे यः स्वरः विद्यमानः अस्ति समासबद्धरूपेणापि समस्तपदे तस्यैव स्वरस्य उपस्थितिः वर्तते। तथा च दृश्यते स्थूलपृषती इत्यत्र स्थूल इति पदं पूर्वपदरूपेण विद्यते। तत्र "फिषोऽन्त उदात्तः"[19] इत्यनेन सूत्रेण प्रातिपदिकत्वात् तस्य अन्तोदात्तः भवति। अतः स्थूल इति

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

शब्दस्य लकारात् परस्थितस्य अकारस्य उदात्तः संज्ञा जायते। यतः बहुव्रीहिसमासस्य समस्तपदस्य पूर्वपदे प्रकृतिस्वरः भवति। निर्देशानुसारेण तत्र उदात्तादिभिः स्वरैः एव निश्चितरूपेण तस्य यथायथम् अर्थनिरूपणं कर्तव्यम्।

अतः उदात्तादीनां स्वराणां ज्ञानम् आवश्यकम्। याज्ञिकैः उपदिष्टेणानेन वचनेन कर्मणः यथायथं निष्पादनं विधेयमस्ति। यज्ञकर्तृभिः ब्राह्मणवाक्येषु विद्यमानानां प्रत्येकानां शब्दानाम् अर्थानां परिज्ञानम् आवश्यकं कर्मसम्पादनार्थमिति।

तत्र परिलक्ष्यते यत् "स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेत" इत्यस्मिन् ब्राह्मणवाक्यस्य स्थूलपृषती इति शब्दस्य अर्थद्वयं जायते। कर्मधारयसमासेन बहुव्रीहिसमासेन च स्थूलपृषती इति सदृशः रूपः भवति। अतः तस्य यथार्थतया अर्थनिर्णये संशयस्य अवकाशः वर्तते। ततः सन्देहस्य निरसणाय उदात्तादिभिः स्वरैः एव तस्य अर्थनिरूपणम् विधीयते। तत्र "समासस्य" सूत्रेण स्थूलपृषती इत्यस्य पदस्य अन्त्यस्वरस्य उदात्तः भवति। ततश्च "अनुदात्तं पदमेकवर्जम्" इति परिभाषासूत्रेण उदात्तम् एकं वर्जयित्वा अवशिष्टाः सर्वे स्वराः अनुदात्ताः भवन्ति।

यतो हि अस्य सूत्रस्य तात्पर्यरूपेण ज्ञायते यत् कस्यचिदेकस्य पदस्य कस्मिञ्चिदेकस्मिन् स्वरे उदात्तः स्वरितः वा विद्यमाने सति अवशिष्टाणां सर्वेषां स्वराणाम् अनुदात्तः संज्ञा भवेदिति। परन्तु "उदात्तादनुदात्तस्य स्वरितः"[20] इत्यनेन सूत्रेण विहितः यः स्वरितस्वरः, तस्मिन् स्वरिते स्वरे "अनुदात्तं पदमेकवर्जम्" इत्ययं सूत्रं न प्रयोज्यम्। अर्थात् तेन सूत्रेण पदस्यान्तर्गतेषु भिन्नेषु स्वरेषु अनुदात्तः न भवति। यतो हि सूत्रमिदं सपादसप्ताध्याय्याः अन्तर्गतम्, अतः त्रिपाद्याम् अवस्थितेन "उदात्तादनुदात्तस्य स्वरितः" इति सूत्रेण विहितः ये स्वरितस्वराः तेषु स्वरितस्वरेषु तस्य प्रयोगः न भवति। मुनिना पाणिनिना प्रोक्तं "पूर्वत्रासिद्धम्"[21] इत्यधिकारसूत्रेण तत् विहितम्। तथा हि तत्र स्थूलपृषती इत्यस्य पदस्य यथार्थतया अर्थनिरूपणम् उदात्तादिभिः स्वरैः कर्तव्यम्। स्वरविचारपूर्वकं वैयाकरणैः निर्दिष्टं यत् पूर्वपदस्य प्रकृतिस्वरविशिष्टत्वात् तत्र बहुव्रीहिसमासः विहितः अस्ति। अतः तेन बहुव्रीहिसमासेन प्रतीयमानस्य अर्थस्य ग्रहणं भवेत्। अस्य तात्पर्यरूपेण विधीयते यत् अग्निदेवतां वरुणदेवतां च उद्दिश्य स्थूलविन्दुयुक्ता गाभी हन्तव्या इति।

यज्ञानां यथार्थतया सम्पादनाय वेदविहितानां ब्राह्मणवाक्यान्तर्गतानां प्रत्येकानां पदानां सुनिश्चितम् अर्थज्ञानम् आवश्यकम्। यतः उदात्तादिभिः स्वरैः एव तेषां पदानाम् अर्थबोधः जायते अतः स्वरादीनां ज्ञानम् अपि अपेक्ष्यते। महाभाष्यकारेण मुनिना पतञ्जलिना व्याकरणस्य अध्ययनस्य पञ्चप्रकाराणां मुख्यप्रयोजनानाम् उल्लेखं कृतम्। तेषु मुख्यप्रयोजनेषु सन्देहस्य निवृत्तिः तथा असन्देहः अन्यतमप्रयोजनरूपेण वर्तते। यज्ञानाम् अनुष्ठानकाले वेदविहितैः वैदिकमन्त्रैः विधिपूर्वकं देवतामुद्दिश्य आहुतिप्रदानं कर्तव्यम्। तेषु वैदिकमन्त्रेषु विद्यमानानां पदानाम् अर्थनिरूपणे कदाचित् सन्देहस्य उपस्थितिः जायते।

व्याकरणशास्त्रेषु येषां ज्ञानं नास्ति, तैः अवैयाकरणैः सन्देहस्य निरसणं न सम्भवति। तस्योदाहरणरूपेण "स्थूलपृषतीमाग्निवारुणी..." इत्यस्य ब्राह्मणवाक्यांशस्योल्लेखं कृतम्। तत्र स्थूलपृषती इति पदस्य अर्थस्य निरूपणे सन्देहस्य अवकाशः जायते। व्याकरणस्य अध्ययनेन एव तस्य सन्देहस्य निरसणं भवेत् इति विद्वद्भिः स्वीकृतम्।

यतः कल्पसूत्रेषु अन्तर्गतैः सूत्रैः विधीयमानानां कर्मणामनुष्ठानानां तथा कर्मकाण्डानां प्रक्रियाणां च परिचालना भवति। तेषु कर्मणामनुष्ठानेषु विविधानां ब्राह्मणवाक्याणां प्रयोगः विधीयते। तेषु ब्राह्मणवाक्येषु निर्दिष्टेभ्यः देवेभ्यः आहुतिप्रदानं विहितमस्ति। ब्राह्मणग्रन्थेभ्यः एव यागादीनां कर्मणामनुष्ठानानां प्रक्रिया ज्ञायते। यागयज्ञादीनां परिचयः तस्मात् ब्राह्मणादेव जायते। यतः मन्त्रः ब्राह्मणं चेत्येतत् द्वयं साकल्येन वेदः तथा परमं ज्ञानम् इति। तथा हि महर्षिणा आपस्तम्बेन प्रोक्तम्— "मन्त्रब्राह्मणयोर्वेदनामधेयम्"[22] इति। अतः वेदविहितैः विविधैः कर्मभिः सह सम्बन्धयुक्तानां निर्दिष्टाणां मन्त्राणां संशयरहितेन प्रयोगः करणीयः इति महाभाष्यकारेणापि उक्तम्। वेदानां षट्सु उपकारेषु अङ्गेषु कल्पः इत्यस्मिन् वेदाङ्गे यागयज्ञादीनां प्रयोगविधीनामुपरि चर्चा वर्तते। तेषां यथार्थतया अनुष्ठानाय व्याकरणमध्येतव्यम्।

अतः निष्कर्षरूपेण वक्तुं शक्यते यत् कल्पवेदाङ्गेन सह व्याकरणस्य सम्बन्धं सुदृढं वर्तते। कल्पसूत्रेषु वैदिककर्मणां प्रयोगः प्रतिपाद्यते। सूत्रशैल्यानुसारेण संक्षिप्ततया विधिवाक्यानि निबद्धानि विद्यन्ते। अतः विधिवाक्यान्तर्गतानां प्रत्येकानां पदानां स्वरूपं ज्ञातव्यम्। यथा 'यजति' 'यजेत' इत्यादीनां पदानां परस्परेण सह कः सम्बन्धः वर्तते, तस्य बोधाय तेषां प्रकृतिप्रत्ययादिविभागं

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

कर्तव्यम्। व्याकरणस्य ज्ञानं विना वेदमन्त्रेषु विद्यमानानां पदानां लिङ्गविभक्तिकारकादयः न अवगम्यन्ते। तेषां सम्यग्प्रयोगे च भाषायाः साधुत्वमपेक्ष्यते। पदानां साधुत्वासाधुत्वानां विचारं करोति व्याकरणम्। विभक्तिनिर्णयं सन्धिं समासं च ज्ञापयति व्याकरणम्। ततश्च लकारादीनां ज्ञानमपि अनेनैव जायते। पदानां प्रकृतिप्रत्ययादिविभागेन विधिवाक्यार्थानां सुस्पष्टमर्थबोधे व्याकरणस्य महती भूमिका वर्तते। अतः कल्पे प्रधानवेदाङ्गस्य व्याकरणस्य विशेषप्रभावः वर्तते इत्यस्मिन् विषये संशयस्यावकासः नास्ति इति।

Endnotes

1. मुण्डकोपनिषद् [१/१/५]
2. पाणिनीयशिक्षायां कारिकासंख्या- [४१/४२]
3. यथा मनुः [३/१४३]
4. बिष्णुमित्रेण कृतम् ऋक्प्रातिशाख्यस्यवृत्तिम्, पृष्ठसंख्या- १३
5. द्रव्यं देवता त्यागः -कात्यायनश्रौतसूत्रस्य प्रथमाध्यायस्य द्वितीयाकण्डिकायाः द्वितीयतमं सूत्रम्।
6. कलापशब्दो लिङ्गानुशासनकारौ प्रायेण पुल्लिङ्गो निर्दिश्यते। अपि च "लिङ्गमशिष्यं लोकश्रयत्वाल्लिङ्गस्य" इति महाभाष्ये- २/१/३६
7. द्र. मीमांसान्यायप्रकाशे पूर्वोक्तमेव संस्करणम्, पृ.४४, पं. ५,७.
8. पूर्वमीमांसायाम्- [८/१/२]
9. महाभाष्यस्य पस्पशाह्निकस्य व्याकरणस्याध्ययनस्य प्रयोजननिरूपणवसरः द्रष्टव्यः।
10. "इदमूह्यमिदमनूह्यमिति न्यायादवस्थिते सम्यग्विपरिणतौ लिङ्गवचनादीनां व्याकरणं निबन्धनमिति आम्नायान्तर प्रतिपत्तिहेतुत्वादासन्नमिति व्यपदिश्यते।" (हरिकारिकावृत्ति १/११)
11. महाभाष्यस्य पस्पशाह्निकस्य व्याकरणस्याध्ययनस्य प्रयोजननिरूपणवसरः द्रष्टव्यः।
12. अष्टाध्यायीम्- २/३/१६
13. महाभाष्यस्य पस्पशाह्निकस्य व्याकरणस्याध्ययनस्य प्रयोजननिरूपणवसरः द्रष्टव्यः।
14. पृषतस्तु मृगे विन्दौसरोहिते। अमरकोष वारिवर्ग श्वेतविन्दुयुतेऽपि स्यात्- भानुजीदीक्षितस्य टीकायाम् उद्धृतः हैमकोषः।
15. अष्टाध्यायीम्- [४/१/६]
16. अष्टाध्यायीम्- [६/१/२२३]
17. अष्टाध्यायीम्- [६/११/५८] "परिभाषेयं स्वरविधिविषया। यत्रान्यः स्वर उदात्तेः स्वरित्ये वा विधीयते तत्र अनुदात्तं पदमेकं वर्जयित्वा भवतीतोतदुपस्थितं द्रष्टव्यम्। अनुदात्ताच्कमनुदात्तम्। कः पुनरेको वर्ज्यते? यस्यासौ स्वरो विधीयते।" काशिका।
18. अष्टाध्यायीम्- [६/२/१]
19. फि [१/१]
20. अष्टाध्यायीम्- ८/४/६६
21. तदेव- ८/२/१
22. आपस्तम्बयज्ञपरिभाषासूत्रम्- [१/३३]

Bibliography

- आश्वलायनः। (२०१८)। *आश्वलायनश्रौतसूत्रम्* (डॉ गोपालप्रसादशर्मा, सम्पादकः)। द भारतीयविद्याप्रकाशनम्, वाराणसी।
- कात्यायनः। (२०१७)। *कात्यायनश्रौतसूत्रम्* (प्रथमो भागः; डॉ जमुनापाठकः, व्याख्याकारः सम्पादकश्च)। चौखम्बा विद्याभवनम्, वाराणसी।
- पतञ्जलिः। (२०१७)। *व्याकरण-महाभाष्यम्,* (दीननाथत्रिपाठी, ब्रह्मचारीमेधाचैतन्यः, दण्डीस्वामी दामोदराश्रमः, अनुवादकाः सम्पदकाश्च)। संस्कृत-वुक-डिपो, कोलकाता।

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

- पतञ्जलिः। (१९८७)। *पाणिनीयव्याकरणमहाभाष्यम्* (प्रथमः खण्डः; श्रीभार्गवशास्त्रिः सम्पादकः)। चौखम्बा संस्कृत प्रतिष्ठान. दिल्ली।
- पाणिनिः। (२०१०)। *अष्टाध्यायी।* (श्रीगोपालदत्तपाण्डेय, सम्पा.)। चौखम्बा-सुरभारती-प्रकाशन।
- पाणिनिः। (२०२२)। *अष्टाध्यायी।* (प. ईश्वरचन्द्रः, व्याख्याकारः)। चौखम्बा-संस्कृत-प्रतिष्ठान, दिल्ली।
- भट्टाचार्यः, तपनशङ्करः। (२०१६) *वैदिकव्याकरण।* संस्कृत-बुक-डिपो, कोलकाता।
- चट्टोपाध्यायः, अमरकुमारः। (१४२४ सन)। *वैदिक-यज्ञ।* संस्कृत-पुस्तक-भाण्डार, कोलकाता।